## कक्षा – नवमी
## संस्कृतम् (कोड-सङ्ख्या -122)
## पाठ्यक्रमः परीक्षानिर्देशाश्च (2021-22)

भाष्यते व्यवहारादिषु प्रयुज्यते इति भाषा, मानवः स्वमनसि विद्यमानान् विचारान् भावनाः अनुभूतिं च अर्थयुक्तैः ध्वनिभिः लिखितसङ्केतैः च अभिव्यक्तयति सा भाषा। भाषा अभिप्रायप्रकटनस्य साधनम्। वस्तुतः लोके द्वयोः मनुष्ययोः मध्ये परस्परम् अवबोधनाय, भावग्रहणाय, भावविनिमयाय च भाषया विना न अन्यत् स्पष्टतमं सरलतमं च साधनं विद्यते। लोके बह्व्यः भाषाः सन्ति यासु संस्कृतभाषा अतिप्राचीनतमा समृद्धा च अस्ति। संस्कृतभाषायाम् एव सन्ति ऋग्यजुस्सामाथर्वाः इति चत्वारः वेदाः, शिक्षा, व्याकरणं, निरुक्तं, ज्योतिषं, छन्दः कल्पः चेति षडङ्गानि, चतुर्दशविद्याः, विज्ञानम्, आयुर्वेदः, योगशास्त्रादयः च ग्रन्थाः। अतः संस्कृतं केवलं भाषा न अपितु किञ्चन जीवनदर्शनम् इति। इयं विद्या (भाषा) भारतीयानां प्रतिष्ठात्मिका कामधेनुः समस्तज्ञानप्रदात्री, ऐक्यप्रदात्री, धर्मार्थकाममोक्षप्रदात्री च अस्ति। सृष्टेः आदितः अद्यावधिः यत् शिक्षणं ज्ञानविज्ञानं च अस्ति तत् सर्वं अस्यां भाषायामेव सन्निहितम् अस्ति। अतिसूक्ष्मभावनां प्रकटयितुं स्पष्टीकर्तुं संस्कृतं विना नैव अन्यत्र विद्यते सामर्थ्यम्। भारतीयं सर्वस्वं विश्वस्य समग्रं तत्त्वं च अस्यां भाषायाम् अस्ति।

संस्कृतस्य भाषावैज्ञानिकत्त्वम् – ऐतिहासिक-वर्णनात्मक-तुलनात्मकाध्ययन-द्वारा भाषायाः प्रकृतेः विकासोत्पत्तेः संरचनायाः अध्ययनपूर्वकं सर्वेषां विषयाणां सैद्धान्तिकः निर्णयः भाषाविज्ञानेन क्रियते। भाषाविज्ञान-नामकशास्त्रे शब्दानाम् उत्पत्तिः, वाक्यानां संरचना इत्यादीनां विषयाणां विचारः क्रियते। भाषाविज्ञानस्य सम्बन्धः सर्वेषां मानवानां भाषाभिः सह अस्ति। एवं भाषाविज्ञाने ध्वनेः, ध्वनि-उच्चारणोपयोगिनां स्वरयन्त्रमुखजिह्वादि-अङ्गानां प्रकृति-प्रत्ययादीनां, संज्ञासर्वनाम-क्रिया-विशेषणादीनां नामाख्यात-उपसर्जननिपातानां पदपदार्थविषयकानां विकारादीनां विकारमूलककारकाणाम् अन्येषां विविधविषयाणाञ्च अध्ययनं क्रियते। भाषाविज्ञाने संस्कृतभाषा-विषयक-वर्णोत्पत्ति-सिद्धान्तस्य अतीववैज्ञानिकं निरूपणं कृतं वर्तते।

विश्वस्य सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा अस्ति। प्रायः सर्वासु भाषासु संस्कृतपरकशब्दाः उपलभ्यन्ते। संस्कृतभाषा भारतीयभाषाणां जननी इति कथ्यते। त्रिवेणीसङ्गमे सरस्वती नदी यथा अन्तर्लीना अस्ति तथैव सर्वासु भारतीयभाषासु संस्कृतभाषा अपि अन्तर्लीना अस्ति इति सर्वे अङ्गीकुर्वन्ति।

भारतदेशः बहुभाषी देशोऽस्ति। अस्मिन् देशे अनेकतायाम् एकतावर्धिनी भाषेयं सामाजिकसमरसतायै जीवनविकासाय च आवश्यकी वर्तते। संस्कृतस्य सांस्कृतिकं महत्त्वं वर्णयन्तः विद्वांसः कथयन्ति “भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा, संस्कृतिमूलं संस्कृतम्, साहित्यं संस्कृतिवाहकञ्च इति।” एषा संस्कृतिः न केवलं भारतस्य अपि तु विश्वस्य मुकुटायमाना अस्ति। उक्तं च

सत्यमहिंसादिगुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।
विश्वशान्तिः सुखधात्री भारतीया हि संस्कृतिः॥

संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः।
संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते॥

एवं संस्कृतभाषा परिनिष्ठिता, दोषरहिता, सरला, गभीरा, यथार्था वैज्ञानिकी च भाषा अस्ति। सम्प्रति युगेस्मिन् प्रमुखैः उद्देश्यैः संस्कृतभाषा शिक्षणीया अस्ति।

**शिक्षणोद्देश्यानि –**

* वसुधैव-कुटुम्बकम् इति भावनाविकासार्थम्
* भारतीयभाषाणां संरक्षणार्थम्
* बौद्धिकविकासपुरस्सरम् आध्यात्मिकनैतिकज्ञानार्थम्
* मानसिकविकासानन्दानुभूतिरसानुभूत्यर्थम्
* भारतीयसंस्कृतेः संरक्षणं ज्ञानवर्धनञ्च।
* आत्मानुशासनसंस्थापनार्थम्
* भाषाशिक्षणकौशलानि वर्धनाय नैपुण्यप्राप्तिः।
* परस्परं वार्तालापमाध्यमेन भावविनिमयः।
* संस्कृतसाहित्यस्य अध्ययनेन ज्ञानानन्दस्य अनुभूतिः।
* मानवजीवनस्य विकासपूर्वकं कल्याणम्।
* संस्कृतभाषया छात्राणां सर्वविधविकासः।

**शिक्षणप्रविधयः -**

* संस्कृतमाध्यमेन सम्भाषणविधिना शनैः शनैः संस्कृतशिक्षणं सम्भविष्यति। गतिवर्धनाय संस्कृताध्यापकानां धैर्येण स्वकीयाध्यापन-कार्यक्रमाणां नियोजनम्। रुचिकरभाषाभ्यासेन भाषिकोपलब्धिः। भाषिकाभ्यासाय वार्तालाप-कथाश्रवण-वादविवाद-संवाद-वर्णनपरकप्रतियोगिताभिः भाषाशिक्षणं कारयितुं शक्यते।
* विभिन्नप्रामाणिकसंस्थानां कार्यक्रमाः साहित्यसामग्र्यश्च प्रयुज्य उत्तमशिक्षणं कर्तुं शक्यते।
* संस्कृतभाषया उपलब्ध-दृश्य-श्रव्य-सामग्री-माध्यमेन भाषाभ्यासः।
* विभिन्नपाठ्यसामग्रीद्वारा शिक्षकः स्वकीयं शिक्षणकार्यं रुचिकरं कर्तुं शक्नोति।
* भाषाशिक्षकः छात्रान् स्नेहपूर्वकम् (आत्मीयभावेन) पाठयेत्।
* अद्यतनपूर्वकं साहित्यकोश-शब्दकोश-सन्दर्भग्रन्थानां सहायतया छात्राणां तत्परतावर्धनम्।
* प्राचीनार्वाचीनयोर्मध्ये समन्वयस्थापनद्वारा नूतनशिक्षणविधिभिश्च संस्कृतशिक्षणम्।

**कौशलानि-**

* ज्ञानात्मक-अवबोधनात्मक-अनुप्रयोगात्मक-विश्लेषणात्मक-संश्लेषणात्मक-मूल्याङ्कनात्मक-लक्षिताधिगमनविशेषाः।
* श्रवणकौशलम् – भावाधिग्रहणाय ध्वन्यात्मकं भाषायाः प्रथमं कौशलम् इदम्। अस्य साधनानि- गुरुमुखम्, आकाशवाणी, दूरवाणी, परिवारसदस्याः, समाजः, कक्ष्याः, ध्वनिमुद्रणयन्त्रम्, दूरदर्शनम् इत्यादयः।
* भाषणकौशलम्- भावाभिव्यक्तये ध्वन्यात्मकं भाषायाः इदं द्वितीयं कौशलम्। वाग्-रूपं भावप्रकटनम् एव भाषणम्, परिसरप्रभावेण आधारेण वा भाषणशक्तिः जायते।
* पठनकौशलम् – भावाधिग्रहणाय लिप्यात्मकं भाषायाः तृतीयं कौशलम् इदम्। (अर्थग्रहणपूर्वकं स्पष्टरूप-वाचनम् इत्यर्थः)
* लेखनकौशलम्- भावाभिव्यक्तये लिप्यात्मकं भाषायाः चतुर्थं कौशलम् इदम्। (ध्वनिरूपे विद्यमानं भाषांशं लिपिरूपे अवतारणं लेखनम् इति उच्यते)

# कक्षा – नवमी (2021-22)

## संस्कृतम् (कोड नं. 122)

**आहत्य-अङ्काः - 80+20**

**आहत्य-कालांशाः – 200**

**वार्षिकमूल्याङ्कनाय निर्मिते प्रश्नपत्रे भागद्वयं भविष्यति –**

| | | | |
|---|---|---|---|
| **'अ' – भागः (बहुविकल्पात्मकाः प्रश्नाः)** | **40 अङ्काः** | | |
| अनुप्रयुक्त – व्याकरणम् | | 25 अङ्काः | 55 कालांशाः |
| पठितावबोधनम् | | 15 अङ्काः | 30 कालांशाः |
| **'आ' – भागः (वर्णनात्मकाः)** | **40 अङ्काः** | | |
| अपठित – अवबोधनम् | | 10 अङ्काः | 25 कालांशाः |
| रचनात्मक – कार्यम् | | 15 अङ्काः | 40 कालांशाः |
| पठित – अवबोधनम् | | 15 अङ्काः | 50 कालांशाः |

**भागानुसारं विषयाः मूल्यभारः च**

| **'अ' – भागः (बहुविकल्पात्मकाः प्रश्नाः) 40 अङ्काः** | | |
|---|---|---|
| **खण्डः** | **विषयाः** | **मूल्यभारः** |
| **अनुप्रयुक्त – व्याकरणम्** | | |
| 1. | सन्धयः | 1×4=4 |
| 2. | शब्दरूपाणि (1+1+1+1) | 1×4=4 |
| 3. | धातुरूपाणि (3+1) | 1×4=4 |
| 4. | कारक-उपपदविभक्तयः | 1×4=4 |
| 5. | प्रत्ययाः | 1×4=4 |
| 6. | सङ्ख्याः | 1×3=3 |
| 7. | उपसर्गाः | 1×2=2 |
| | **पूर्णभारः** | **25 अङ्काः** |
| **पठित – अवबोधनम्** | | |
| 8. | प्रश्ननिर्माणम् | 1×5=5 |
| 9. | प्रसङ्गानुसारम् अर्थचयनम् | 1×4=4 |
| 10. | भाषिककार्यम् (पाठाधारितम्) | 1×6=6 |
| | **पूर्णभारः** | **15 अङ्काः** |
| | | **सम्पूर्णभारः 40 अङ्काः** |

| ‘आ’ – भागः (वर्णनात्मकाः प्रश्नाः) 40 अङ्काः | | | |
|---|---|---|---|
| **खण्डः** | **विषयाः** | **प्रश्नप्रकाराः** | **मूल्यभारः** |
| **अपठित – अवबोधनम्** | | | |
| 11. | एकः गद्यांशः (80-100 शब्दपरिमितः) | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>शीर्षकम्<br>भाषिककार्यम् | 1×2=2<br>2×2=4<br>1×1=1<br>1×3=3 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| **रचनात्मक – कार्यम्** | | | |
| 12. | औपचारिकम् अथवा अनौपचारिकं पत्रम्<br>(मञ्जूषायाः सहायतया पूर्णं पत्रं लेखनीयम्) | निबन्धात्मकः | ½×10=5 |
| 13. | चित्रवर्णनम् अथवा अनुच्छेदलेखनम् | पूर्णवाक्यात्मकः | 1×5=5 |
| 14. | हिन्दी/आङ्ग्लभाषातः संस्कृतेन अनुवादः | पूर्णवाक्यात्मकः | 1×5=5 |
| | | **पूर्णभारः** | **15 अङ्काः** |
| **पठित – अवबोधनम्** | | | |
| 15. | गद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ | ½×2=1<br>1×2=2 |
| 16. | पद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ | ½×2=1<br>1×2=2 |
| 17. | नाट्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ | ½×2=1<br>1×2=2 |
| 18. | अन्वयः | निबन्धात्मकः | ½×4=2 |
| 19. | घटनाक्रमानुसारं वाक्यलेखनम् | निबन्धात्मकः | ½×8=4 |
| | | **पूर्णभारः** | **15 अङ्काः** |
| | | | **सम्पूर्णभारः 40 अङ्काः** |

**‘अ’ भागः 40 + ‘आ’ भागः 40 = सम्पूर्णभारः 80 अङ्काः**

## Examination Structure 2021-22

### Sanskrit (Code - 122)

### Class - IX

| Type of Question | No. of Question | No. of Division | Mark per Question | Total Marks |
|---|---|---|---|---|
| MCQ 1 Mark | 4+4+4+4+4+3+2+5+4+6=40 | 10 | 1 | 40 |
| VSA ½ Mark | 2+2+2=6 | 3 | ½ | 3 |
| VSA 1 Mark | 2=2 | 1 | 1 | 2 |
| LA ½ Mark (Fill in the Blanks) | 10+4=14 | 2 | ½ | 7 |
| LA ½ Mark | 8=8 | 1 | ½ | 4 |
| LA 1 Mark | 5+5+2+2+2=16 | 5 | 1 | 16 |
| LA 2 Marks | 2=2 | 1 | 2 | 4 |
| Title Q 1 Mark | 1=1 | 1 | 1 | 1 |
| SA Q 1 Mark | 3=1 | 1 | 1 | 3 |
| | | | **Total** | **80** |

## संस्कृतपाठ्यक्रमः (कोड नं. 122)
## कक्षा –नवमी (2021 - 22)
### वार्षिकं मूल्याङ्कनम्

**‘अ’ – भागः** **40 अङ्काः**

**(बहुविकल्पात्मकाः प्रश्नाः)**

| | |
|---|---|
| **अनुप्रयुक्त-व्याकरणम्*** (25 अङ्काः) | 1. **सन्धिकार्यम्** 4<br>**स्वरसन्धिः** (2 अङ्कौ)<br>➢ दीर्घः, गुणः, वृद्धिः, यण्, अयादिः<br>**व्यञ्जनसन्धिः** (1 अङ्कः)<br>➢ वर्गीयप्रथमवर्णस्य तृतीयवर्णे परिवर्तनम् , ‘म्’ स्थाने अनुस्वारः<br>**विसर्गसन्धिः** (1 अङ्कः)<br>➢ उत्वम् , सत्वम्<br>2. **शब्दरूपाणि**<br>**पुँल्लिङ्गशब्दाः** (1 अङ्कः) 4<br>➢ अकारान्तः - बालकवत्, उकारान्तः - साधुवत्,<br>इकारान्तः - मुनिवत्, ऋकारान्तः - पितृवत्<br>➢ हलन्तः - राजन्, भवत्, गुणिन्, विद्वस्<br>**स्त्रीलिङ्गशब्दाः** (1 अङ्कः)<br>➢ आकारान्तः - लतावत्, इकारान्तः - मतिवत्, ईकारान्तः - नदीवत् ,<br>उकारान्तः - धेनुवत्, ऋकारान्तः - मातृवत्<br>**नपुंसकलिङ्गशब्दाः** (1 अङ्कः)<br>➢ अकारान्तः - फलवत्, इकारान्तः - वारिवत्, उकारान्तः - मधुवत्<br>➢ हलन्तः - जगत्<br>**सर्वनामशब्दाः** (1 अङ्कः)<br>➢ अस्मद्, युष्मद्<br>➢ किम्, तत् (त्रिषु लिङ्गेषु)<br>3. **धातुरूपाणि** 4<br>**परस्मैपदिनः.** (3 अङ्काः)<br>➢ पठ्, गम्, वद्, भू , क्रीड्, नी, दृश्, अस्, कृ, पा(पिब्)<br>त्यज्, स्था, शक्, क्षाल्, ज्ञा, श्रु, दा, सृच्, रक्ष्, हस्,<br>धृ, स्मृ, मिल्, कुप्, (पञ्चसु लकारेषु)<br>**आत्मनेपदिनः** (1 अङ्कः)<br>➢ सेव्, लभ्, वन्द् , रुच् (लट्लकारे, लृट्लकारे लङ्लकारे च)<br>4. **कारक-उपपद-विभक्तयः** 4<br>➢ **द्वितीया** –परितः, समया/निकषा, प्रति, विना, उभयतः, धिक्,<br>➢ **तृतीया** – सह/ समम्/ सार्धम्, विना, अलम्, हीन |

| | | |
|---|---|---|
| | ➢ **चतुर्थी** – रुच्, दा (यच्छ्), नमः, कुप्/क्रुध्, स्वस्ति, स्वाहा<br>➢ **पञ्चमी** – विना, ऋते, बहिः , भयार्थे, रक्ष्, अनन्तरम्, पूर्वम्, परः<br>➢ **षष्ठी** – उपरि, अधः, पुरतः, पृष्ठतः, वामतः, दक्षिणतः, निर्धारणे<br>➢ **सप्तमी**- स्निह्, विश्वस्, निपुण, कुशल, प्रवीण | |
| | 5. **प्रत्ययाः**<br>➢ क्त्वा, तुमुन्, ल्यप्, क्तवतु, क्त, शतृ, शानच् | 4 |
| | 6. **सङ्ख्या** – 1-100, 1-4 त्रिषु लिङ्गेषु केवलं प्रथमा-विभक्तौ | 3 |
| | 7. **उपसर्गाः** (द्वाविंशतिः) | 2 |
| **पठितावबोधनम्**<br>**(15 अङ्काः)** | 8. **वाक्येषु रेखाङ्कितपदानि अधिकृत्य उचितप्रश्नवाचकपदानां चयनम्** | 5 |
| | 9. **प्रसङ्गानुसारम् अर्थचयनम्**<br>(पाठान् आधृत्य बहुविकल्पात्मकाः प्रश्नाः) | 4 |
| | 10. **भाषिककार्याय तत्त्वानि (पाठाधारितानि) -**<br>✓ वाक्ये कर्तृ – क्रिया पदचयनम्<br>✓ कर्तृ - क्रिया – अन्वितिः<br>✓ विशेषण – विशेष्यचयनम्<br>✓ पर्याय – विलोमपद – चयनम् | 6 |
| | | **योगः** = 40 **अङ्काः** |

## ‘आ’ – भागः 40 अङ्काः
## (वर्णनात्मकाः प्रश्नाः)

| | | |
|---|---|---|
| **अपठित –**<br>**अवबोधनम्**<br>**(10 अङ्काः)** | 1. **एकः गद्यांशः**<br>80-100 शब्दपरिमितः गद्यांशः, सरलकथा<br>➢ एकपदेन पूर्णवाक्येन च अवबोधनात्मकं कार्यम् (2+4)<br>➢ शीर्षकलेखनम् (1)<br>➢ अनुच्छेद – आधारितं भाषिकं कार्यम् (3)<br>भाषिककार्याय तत्त्वानि -<br>✓ वाक्ये कर्तृ – क्रिया पदचयनम्<br>✓ विशेषण – विशेष्य चयनम्<br>✓ पर्याय – विलोमपद – चयनम् | 10 |
| **रचनात्मकं कार्यम्**<br>**(15 अङ्काः)** | 2. **सङ्केताधारितम् औपचारिकम् अथवा अनौपचारिकं पत्रलेखनम्**<br>(मञ्जूषायाः सहायतया पूर्णं पत्रं लेखनीयम्) | 5 |
| | 3. **चित्राधारितं वर्णनम् अथवा अनुच्छेदलेखनम्**<br>(मञ्जूषायाः सहायतया चित्रवर्णनम् अनुच्छेदलेखनं वा करणीयम्) | 5 |
| | 4. **हिन्दीभाषया आङ्ग्लभाषया वा लिखितानां पञ्चसरलवाक्यानां संस्कृतभाषया अनुवादः** | 5 |

| | | |
|---|---|---|
| पठित – अवबोधनम् (15 अङ्काः) | 5. **गद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्**<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि।<br>6. **पद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्**<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि।<br>7. **नाट्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्**<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि।<br>8. **एकस्य श्लोकस्य अन्वयः**<br>(मञ्जूषायाः सहायतया पूर्णः अन्वयः लेखनीयः)<br>9. **घटनाक्रमानुसारं कथालेखनम्** | 3<br><br>3<br><br>3<br><br>2<br><br>4 |
| | | **योगः = 40 अङ्काः** |

**पुस्तकम् – 'शेमुषी' संस्कृतपुस्तकम् (नवमश्रेण्यै)**

**परीक्षायै निर्धारिताः पाठाः –**

| **पाठसङ्ख्या** | **पाठनाम** |
|---|---|
| प्रथमः पाठः | भारतीवसन्तगीतिः |
| द्वितीयः पाठः | स्वर्णकाकः |
| तृतीयः पाठः | गोदोहनम् |
| चतुर्थः पाठः | कल्पतरुः |
| पञ्चमः पाठः | सूक्तिमौक्तिकम् |
| षष्ठः पाठः | भ्रान्तो बालः |
| अष्टमः पाठः | लौहतुला |
| नवमः पाठः | सिकतासेतुः |
| दशमः पाठः | जटायोः शौर्यम् |
| एकादशः पाठः | पर्यावरणम् |

* **अनुप्रयुक्तव्याकरणस्य अंशानां चयनं यथासम्भवं 'शेमुषी' पाठ्यपुस्तकात् करणीयम्। यदि ततः न सम्भवति तर्हि 'अभ्यासवान् भव - प्रथमो भागः' इत्यस्मात् कर्तुं शक्यम्।**

**निर्धारित – पाठ्यपुस्तकानि –**

1. '**शेमुषी**'- प्रथमो भागः, पाठ्यपुस्तकम् , **संशोधितसंस्करणम्** (प्रकाशनम् – रा.शै.अनु.प्र.परि.)
2. '**अभ्यासवान् भव**' - प्रथमो भागः – व्याकरणपुस्तकम् (प्रकाशनम् – रा.शै.अनु.प्र.परि.)
3. '**व्याकरणवीथिः**'- व्याकरणपुस्तकम् (प्रकाशनम् – रा.शै.अनु.प्र.परि.)

## आन्तरिक-मूल्याङ्कनम्
(20 अङ्काः)

**उद्देश्यानि**

- ❖ छात्राणां सृजनात्मकक्षमतायाः विकासः।
- ❖ श्रवण-भाषण-पठन-लेखनकौशलानां विकासः।
- ❖ चिन्तनक्षमतायाः आत्मविश्वासस्य च संवर्धनम्।

| क्र. सं. | गतिविधयः | उदाहरणानि | अङ्काः | निर्देशाः | मूल्याङ्कनबिन्दवः |
|---|---|---|---|---|---|
| 1. | **आवधिक-परीक्षाः (पीरियोडिक्-असैस्मैंट)** | लिखितपरीक्षा | 05 | विद्यालयेन समये समये लिखितपरीक्षाणाम् आयोजनं करणीयं भवति। | परीक्षासु यत्र विद्यार्थिनः श्रेष्ठाः अङ्काः स्युः तयोः द्वयोः परीक्षयोः एव अधिभारः ग्रहीतव्यः। अपि च आवधिकपरीक्षासु अपि प्रश्नेषु आन्तरिकविकल्पाः देयाः। मूल्याङ्कनसमये यदि छात्रः सर्वान् प्रश्नान् उत्तरति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः सन्ति तेषाम् एव मूल्याङ्कनं करणीयम्। |
| 2 | **बहुविधमूल्याङ्कनम्** | ❖ कक्षायां पाठितस्य पाठस्य लघुमूल्याङ्कनम्<br>❖ निर्गतपत्राणि<br>❖ प्रश्नोत्तरी<br>❖ मौखिकी परीक्षा<br>❖ प्रतियोगिताः<br>❖ प्रश्नमञ्चस्य आयोजनम् | 05 | कक्षायां पाठित-पाठस्य विषयस्य वा बहुविधं मूल्याङ्कनम् अपेक्षितम् अस्ति। अनेन विद्यार्थिनां विविधकौशलानां मूल्याङ्कनं भवेत्। | ❖ मौलिकता<br>❖ विषयसम्बद्धता<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम् |
| 3. | **निवेशसूचिका (पोर्टफोलियो)** | ❖ कक्षाकार्यम्<br>❖ सामूहिक-मूल्याङ्कनम्<br>❖ स्वमूल्याङ्कनम्<br>❖ विद्यार्थिनः विषयगताः उपलब्धयः | 05 | विद्यार्थिभिः कक्षायां कृतानां कार्याणाम् उपलब्धीनां च संरक्षणं संयोजनं च सञ्चिकायां पत्रावल्यां वा करणीयम्। एतेन समग्रं मूल्याङ्कनं प्रमाणिकत्वेन भवितुं शक्नोति। | ❖ सुलेखः<br>❖ तथ्यात्मकता<br>❖ प्रामाणिकता<br>❖ समयबद्धता |

| | | | | | |
|---|---|---|---|---|---|
| **4.** | **भाषा-संवर्धनाय गतिविधयः**<br>**(क) श्रवण-भाषण-कौशलम्** | ❖ कथा<br>❖ संवादः / वार्तालापः<br>❖ भाषणम्<br>❖ नाटकम्<br>❖ वार्ताः<br>❖ आशुभाषणम्<br>❖ संस्कृतगीतानि<br>❖ श्लोकोच्चारणम्<br>❖ प्रहेलिकाः | 05 | ❖ छात्राः कामपि कथां श्रावयितुं शक्नुवन्ति।<br>❖ शिक्षकः कमपि विषयं सूचयित्वा परस्परं संवादं कारयितुं शक्नोति।<br>❖ दूरदर्शने वार्तावली इत्याख्यः संस्कृत-कार्यक्रमः प्रसारितः भवति तं द्रष्टुं छात्राः प्रेरणीयाः।<br>❖ श्रवण-कौशल-मूल्याङ्कनाय शिक्षकः स्वयम् अपि कथां श्रावयित्वा ततः सम्बद्ध-प्रश्नान् प्रष्टुं शक्नोति। | ❖ उच्चारणम्<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम् (आरोहावरोह-गतियति-प्रयोगः) |
| | **(ख) लेखनकौशलम्** | ❖ विविधविषयान् आधृत्य मौलिकलेखनम् यथा– देशः, माता, पिता, गुरुः, विद्या पर्यावरणम्, योगः, समयस्य सदुपयोगः , शिक्षा, अनुशासनम् इत्यादयः।<br>❖ शैक्षिकभ्रमणस्य संस्कृतेन प्रतिवेदनलेखनम्।<br>❖ दैनन्दिनीलेखनम्।<br>❖ सङ्केताधारितं कथालेखनम्।<br>❖ भित्तिपत्रिकायाः निर्माणम्।<br>❖ श्रुतलेखः<br>❖ सूक्तिलेखनम् | | ❖ छात्राः यथाशक्यं कक्षायामेव लेखनकार्यं कुर्युः।<br>❖ टिप्पणी- पुस्तिकायाः निर्माणम्।<br>❖ वैयक्तिकपरीक्षणम्। | ❖ विषय-सम्बद्धता<br>❖ शुद्धता (विशेषतः पञ्चमवर्णस्यप्रयोगः)<br>❖ समयबद्धता<br>❖ सुलेखः<br>❖ प्रस्तुतीकरणम् |
| | **अवधातव्यम्** –उपर्युक्त-गतिविधयः उदाहरणरूपेण प्रदत्ताः सन्ति। एतदतिरिच्य एतादृशाः अन्यगतिविधयः अपि भवितुमर्हन्ति। | | | | |

**************************************

# कक्षा – दशमी
# संस्कृतम् (कोडसङ्ख्या -122)
# पाठ्यक्रमः परीक्षानिर्देशाश्च (2021-22)

भाष्यते व्यवहारादिषु प्रयुज्यते इति भाषा, मानवः स्वमनसि विद्यमानान् विचारान् भावनाः अनुभूतिं च अर्थयुक्तैः ध्वनिभिः लिखितसङ्केतैः च अभिव्यक्तयति सा भाषा। भाषा अभिप्रायप्रकटनस्य साधनम्। वस्तुतः लोके द्वयोः मनुष्ययोः मध्ये परस्परम् अवबोधनाय, भावग्रहणाय, भावविनिमयाय च भाषया विना न अन्यत् स्पष्टतमं सरलतमं च साधनं विद्यते। लोके बहव्यः भाषाः सन्ति यासु संस्कृतभाषा अतिप्राचीनतमा समृद्धा च अस्ति। संस्कृतभाषायाम् एव सन्ति ऋग्यजुस्सामाथर्वाः इति चत्वारः वेदाः, शिक्षा, व्याकरणं, निरुक्तं, ज्योतिषं, छन्दः कल्पः चेति षडङ्गानि, चतुर्दशविद्याः, विज्ञानम्, आयुर्वेदः, योगशास्त्रादयः च ग्रन्थाः। अतः संस्कृतं केवलं भाषा न अपितु किञ्चन जीवनदर्शनम् इति। इयं विद्या (भाषा) भारतीयानां प्रतिष्ठात्मिका कामधेनुः समस्तज्ञानप्रदात्री, ऐक्यप्रदात्री, धर्मार्थकाममोक्षप्रदात्री च अस्ति। सृष्टेः आदितः अद्यावधिः यत् शिक्षणं ज्ञानविज्ञानं च अस्ति तत् सर्वं अस्यां भाषायामेव सन्निहितम् अस्ति। अतिसूक्ष्मभावनां प्रकटयितुं स्पष्टीकर्तुं संस्कृतं विना नैव अन्यत्र विद्यते सामर्थ्यम्। भारतीयं सर्वस्वं विश्वस्य समग्रं तत्त्वं च अस्यां भाषायाम् अस्ति।

संस्कृतस्य भाषावैज्ञानिकत्त्वम् – ऐतिहासिक-वर्णनात्मक-तुलनात्मकाध्ययन-द्वारा भाषायाः प्रकृतेः विकासोत्पत्तेः संरचनायाः अध्ययनपूर्वकं सर्वेषां विषयाणां सैद्धान्तिकः निर्णयः भाषाविज्ञानेन क्रियते। भाषाविज्ञान-नामकशास्त्रे शब्दानाम् उत्पत्तिः, वाक्यानां संरचना इत्यादीनां विषयाणां विचारः क्रियते। भाषाविज्ञानस्य सम्बन्धः सर्वेषां मानवानां भाषाभिः सह अस्ति। एवं भाषाविज्ञाने ध्वनेः, ध्वनि-उच्चारणोपयोगिनां स्वरयन्त्रमुखजिह्वादि-अङ्गानां प्रकृति-प्रत्ययादीनां, संज्ञासर्वनाम-क्रिया-विशेषणादीनां नामाख्यात-उपसर्जननिपातानां पदपदार्थविषयकानां विकारादीनां विकारमूलककारकाणाम् अन्येषां विविधविषयाणाञ्च अध्ययनं क्रियते। भाषाविज्ञाने संस्कृतभाषा-विषयक-वर्णोत्पत्ति-सिद्धान्तस्य अतीववैज्ञानिकं निरूपणं कृतं वर्तते।

विश्वस्य सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा अस्ति। प्रायः सर्वासु भाषासु संस्कृतपरकशब्दाः उपलभ्यन्ते। संस्कृतभाषा भारतीयभाषाणां जननी इति कथ्यते। त्रिवेणीसङ्गमे सरस्वती नदी यथा अन्तर्लीना अस्ति तथैव सर्वासु भारतीयभाषासु संस्कृतभाषा अपि अन्तर्लीना अस्ति इति सर्वे अङ्गीकुर्वन्ति।

भारतदेशः बहुभाषी देशोऽस्ति। अस्मिन् देशे अनेकतायाम् एकतावर्धिनी भाषेयं सामाजिकसमरसतायै जीवनविकासाय च आवश्यकी वर्तते। संस्कृतस्य सांस्कृतिकं महत्त्वं वर्णयन्तः विद्वांसः कथयन्ति "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा, संस्कृतिमूलं संस्कृतम्, साहित्यं संस्कृतिवाहकञ्च इति।" एषा संस्कृतिः न केवलं भारतस्य अपि तु विश्वस्य मुकुटायमाना अस्ति। उक्तं च

सत्यमहिंसादिगुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।<br>
विश्वशान्तिः सुखधात्री भारतीया हि संस्कृतिः॥

संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः।<br>
संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते॥

एवं संस्कृतभाषा परिनिष्ठिता, दोषरहिता, सरला, गभीरा, यथार्था वैज्ञानिकी च भाषा अस्ति। सम्प्रति युगेस्मिन् प्रमुखैः उद्देश्यैः संस्कृतभाषा शिक्षणीया अस्ति।

**शिक्षणोद्देश्यानि –**

- वसुधैव-कुटुम्बकम् इति भावनाविकासार्थम्
- भारतीयभाषाणां संरक्षणार्थम्
- बौद्धिकविकासपुरस्सरम् आध्यात्मिकनैतिकज्ञानार्थम्
- मानसिकविकासानन्दानुभूतिरसानुभूत्यर्थम्
- भारतीयसंस्कृतेः संरक्षणं ज्ञानवर्धनञ्च।
- आत्मानुशासनसंस्थापनार्थम्
- भाषाशिक्षणकौशलानि वर्धनाय नैपुण्यप्राप्तिः।
- परस्परं वार्तालापमाध्यमेन भावविनिमयः।
- संस्कृतसाहित्यस्य अध्ययनेन ज्ञानानन्दस्य अनुभूतिः।
- मानवजीवनस्य विकासपूर्वकं कल्याणम्।
- संस्कृतभाषया छात्राणां सर्वविधविकासः।

**शिक्षणप्रविधयः -**

- संस्कृतमाध्यमेन सम्भाषणविधिना शनैः शनैः संस्कृतशिक्षणं सम्भविष्यति। गतिवर्धनाय संस्कृताध्यापकानां धैर्येण स्वकीयाध्यापन-कार्यक्रमाणां नियोजनम्। रुचिकरभाषाभ्यासेन भाषिकोपलब्धिः। भाषिकाभ्यासाय वार्तालाप-कथाश्रवण-वादविवाद-संवाद-वर्णनपरकप्रतियोगिताभिः भाषाशिक्षणं कारयितुं शक्यते।
- विभिन्नप्रामाणिकसंस्थानां कार्यक्रमाः साहित्यसामग्र्यश्च प्रयुज्य उत्तमशिक्षणं कर्तुं शक्यते।
- संस्कृतभाषया उपलब्ध-दृश्य-श्रव्य-सामग्री-माध्यमेन भाषाभ्यासः।
- विभिन्नपाठ्यसामग्रीद्वारा शिक्षकः स्वकीयं शिक्षणकार्यं रुचिकरं कर्तुं शक्नोति।
- भाषाशिक्षकः छात्रान् स्नेहपूर्वकम् (आत्मीयभावेन) पाठयेत्।
- अद्यतनपूर्वकं साहित्यकोश-शब्दकोश-सन्दर्भग्रन्थानां सहायतया छात्राणां तत्परतावर्धनम्।
- प्राचीनार्वाचीनयोर्मध्ये समन्वयस्थापनद्वारा नूतनशिक्षणविधिभिश्च संस्कृतशिक्षणम्।

**कौशलानि-**

- ज्ञानात्मक-अवबोधनात्मक-अनुप्रयोगात्मक-विश्लेषणात्मक-संश्लेषणात्मक-मूल्याङ्कनात्मक-लक्षिताधिगमनविशेषाः।
- श्रवणकौशलम् – भावाधिग्रहणाय ध्वन्यात्मकं भाषायाः प्रथमं कौशलम् इदम्। अस्य साधनानि- गुरुमुखम्, आकाशवाणी, दूरवाणी, परिवारसदस्याः, समाजः, कक्ष्याः, ध्वनिमुद्रणयन्त्रम्, दूरदर्शनम् इत्यादयः।
- भाषणकौशलम्- भावाभिव्यक्तये ध्वन्यात्मकं भाषायाः इदं द्वितीयं कौशलम्। वाग्-रूपं भावप्रकटनम् एव भाषणम्, परिसरप्रभावेण आधारेण वा भाषणशक्तिः जायते।
- पठनकौशलम् – भावाधिग्रहणाय लिप्यात्मकं भाषायाः तृतीयं कौशलम् इदम्। (अर्थग्रहणपूर्वकं स्पष्टरूप-वाचनम् इत्यर्थः)
- लेखनकौशलम्- भावाभिव्यक्तये लिप्यात्मकं भाषायाः चतुर्थं कौशलम् इदम्। (ध्वनिरूपे विद्यमानं भाषांशं लिपिरूपे अवतारणं लेखनम् इति उच्यते)

## कक्षा – दशमी (2021-22)
## संस्कृतम् (कोड नं. 122)

**आहत्य-अङ्काः - 80+20**
**आहत्य-कालांशाः 200**

**वार्षिकमूल्याङ्कनाय निर्मिते प्रश्नपत्रे भागद्वयं भविष्यति –**

| | | |
|---|---|---|
| **'अ' – भागः (बहुविकल्पात्मकाः प्रश्नाः)** | **40 अङ्काः** | |
| अनुप्रयुक्त – व्याकरणम् | 25 अङ्काः | 55 कालांशाः |
| पठितावबोधनम् | 15 अङ्काः | 30 कालांशाः |
| **'आ' – भागः (वर्णनात्मकाः प्रश्नाः)** | **40 अङ्काः** | |
| अपठित – अवबोधनम् | 10 अङ्काः | 25 कालांशाः |
| रचनात्मक – कार्यम् | 15 अङ्काः | 40 कालांशाः |
| पठित – अवबोधनम् | 15 अङ्काः | 50 कालांशाः |

**भागानुसारं विषयाः मूल्यभारः च**

| **'अ' – भागः (बहुविकल्पात्मकाः प्रश्नाः) 40 अङ्काः** | | |
|---|---|---|
| **खण्डः** | **विषयाः** | **मूल्यभारः** |
| | **अनुप्रयुक्त – व्याकरणम्** | |
| 1. | सन्धिः | 1×4=4 |
| 2. | समासः | 1×4=4 |
| 3. | प्रत्ययः | 1×4=4 |
| 4. | वाच्यम् | 1×3=3 |
| 5. | समयः | 1×4=4 |
| 6. | अव्ययानि | 1×3=3 |
| 7. | संशोधनकार्यम् | 1×3=3 |
| | **पूर्णभारः** | **25 अङ्काः** |
| | **पठित – अवबोधनम्** | |
| 8. | प्रश्ननिर्माणम् | 1×5=5 |
| 9. | प्रसङ्गानुसारम् अर्थचयनम् | 1×4=4 |
| 10. | भाषिककार्यम् (पाठाधारितम्) | 1×6=6 |
| | **पूर्णभारः** | **15 अङ्काः** |
| | | **सम्पूर्णभारः 40 अङ्काः** |

| 'आ' – भागः (वर्णनात्मकाः प्रश्नाः) | | | 40 अङ्काः |
|---|---|---|---|
| **खण्डः** | **विषयाः** | **प्रश्नप्रकाराः** | **मूल्यभारः** |
| **अपठित – अवबोधनम्** | | | |
| 11. | एकः गद्यांशः (80-100 शब्दपरिमितः) | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>शीर्षकम्<br>भाषिककार्यम् | 1×2=2<br>2×2=4<br>1×1=1<br>1×3=3 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| **रचनात्मक – कार्यम्** | | | |
| 12. | औपचारिकम् अथवा अनौपचारिकं पत्रम्<br>(मञ्जूषायाः सहायतया पूर्णं पत्रं लेखनीयम्) | निबन्धात्मकः | ½×10=5 |
| 13. | चित्रवर्णनम् अथवा अनुच्छेदलेखनम् | पूर्णवाक्यात्मकाः/ निबन्धात्मकः | 1×5=5 |
| 14. | हिन्दी/आङ्ग्लभाषातः संस्कृतेन अनुवादः | पूर्णवाक्यात्मकाः | 1×5=5 |
| | | **पूर्णभारः** | **15 अङ्काः** |
| **पठित – अवबोधनम्** | | | |
| 15. | गद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ | ½×2=1<br>1×2=2 |
| 16. | पद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ | ½×2=1<br>1×2=2 |
| 17. | नाट्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ | ½×2=1<br>1×2=2 |
| 18. | अन्वयः | निबन्धात्मकः | ½×4=2 |
| 19. | घटनाक्रमानुसारं वाक्यलेखनम् | निबन्धात्मकः | ½×8=4 |
| | | **पूर्णभारः** | **15 अङ्काः** |
| | | | **सम्पूर्णभारः 40 अङ्काः** |

**'अ' भागः 40 + 'आ' भागः 40 = सम्पूर्णभारः 80 अङ्काः**

Examination Structure 2021-22

Sanskrit (Code-122)

Class - X

| Type of Question | No. of Question | No. of Division | Mark per Question | Total Marks |
|---|---|---|---|---|
| MCQ 1 Mark | 4+4+4+3+4+3+3+5+4+6=40 | 10 | 1 | 40 |
| VSA ½ Mark | 2+2+2=6 | 3 | ½ | 3 |
| VSA 1 Mark | 2=2 | 1 | 1 | 2 |
| LA ½ Mark (Fill in the Blanks) | 10+4=14 | 2 | ½ | 7 |
| LA ½ Mark | 8=8 | 1 | ½ | 4 |
| LA 1 Mark | 5+5+2+2+2=16 | 5 | 1 | 16 |
| LA 2 Marks | 2=2 | 1 | 2 | 4 |
| Title Q 1 Mark | 1=1 | 1 | 1 | 1 |
| SA Q 1 Mark | 3=1 | 1 | 1 | 3 |
| | | | **Total** | **80** |

## संस्कृतपाठ्यक्रमः (कोड नं. 122)

## कक्षा –दशमी (2021 - 22)

**वार्षिकं मूल्याङ्कनम्** **40 अङ्काः**

**'अ' - भागः**

**(बहुविकल्पात्मकाः प्रश्नाः)**

| | | |
|---|---|---|
| अनुप्रयुक्त-व्याकरणम् * (25 अङ्काः) | 1. **सन्धिकार्यम्**<br>**व्यञ्जनसन्धिः** (2 अङ्कौ)<br>➢ वर्गीयप्रथमवर्णस्य तृतीयवर्णे परिवर्तनम्, प्रथमवर्णस्य पञ्चमवर्णे परिवर्तनम्<br>**विसर्गसन्धिः** (2 अङ्कौ)<br>➢ विसर्गस्य उत्वम्, रत्वम् , लोपः, विसर्गस्य स्थाने स्, श्, ष् | 4 |
| | 2. **समासः - वाक्येषु समस्तपदानां विग्रहः विग्रहपदानां च समासः**<br>➢ तत्पुरुषः – विभक्तिः (1 अङ्कः)<br>➢ बहुव्रीहिः (1 अङ्कः)<br>➢ अव्ययीभावः (अनु, उप, सह, निर्, प्रति, यथा) (1 अङ्कः)<br>➢ द्वन्द्वः (1 अङ्कः) | 4 |
| | 3. **प्रत्ययाः**<br>➢ तद्धिताः – ठक्, मतुप्, त्व, तल् (3 अङ्काः)<br>➢ स्त्रीप्रत्ययौ – टाप् , ङीप् (1 अङ्कः) | 4 |
| | 4. **वाच्यम् - केवलं लट्लकारे ( कर्तृ-कर्म-क्रिया)** | 3 |
| | 5. **समयः** - अङ्कानां स्थाने शब्देषु समयलेखनम्<br>(सामान्य – सपाद – सार्ध – पादोन) | 4 |
| | 6. **अव्ययपदानि**<br>उच्चैः, च, श्वः, ह्यः , अद्य, अत्र-तत्र, यत्र-कुत्र, इदानीम्, (अधुना, सम्प्रति, साम्प्रतम्)<br>यदा, तदा, कदा, सहसा, वृथा, शनैः, अपि, कुतः, इतस्ततः, यदि-तर्हि, यावत्-तावत्। | 3 |
| | 7. **अशुद्धि-संशोधनम् (लिङ्ग- विभक्ति-वचन-पुरुष-लकार-दृष्ट्या संशोधनम्)** | 3 |
| पठितावबोधनम् (15 अङ्काः) | 8. **वाक्येषु रेखाङ्कितपदानि अधिकृत्य उचितप्रश्नवाचकपदचनम्** | 5 |
| | 9. **प्रसङ्गानुसारम् अर्थचयनम्**<br>(पाठान् आधृत्य बहुविकल्पात्मकाः प्रश्नाः ) | 4 |
| | 10. **भाषिककार्याय तत्त्वानि (पाठाधारितानि) -**<br>✓ वाक्ये कर्तृ – क्रिया पदचयनम्<br>✓ विशेषण – विशेष्य चयनम्<br>✓ पर्याय – विलोमपद – चयनम् | 6 |
| | | **योगः** = 40 **अङ्काः** |

## 'आ' – भागः 40 अङ्काः

## (वर्णनात्मकाः प्रश्नाः)

| | | |
|---|---|---|
| अपठित – अवबोधनम् (10 अङ्काः) | 1. **एकः गद्यांशः**<br>80-100 शब्दपरिमितः गद्यांशः, सरलकथा<br>➢ एकपदेन (2 अङ्कौ)<br>➢ पूर्णवाक्येन च अवबोधनात्मकं कार्यम् (4 अङ्काः)<br>➢ शीर्षकलेखनम् (1 अङ्कः)<br>➢ अनुच्छेद – आधारितं भाषिकं कार्यम् (3 अङ्काः)<br>भाषिककार्याय तत्त्वानि -<br>✓ वाक्ये कर्तृ – क्रिया पदचयनम्<br>✓ कर्तृ - क्रिया – अन्वितिः<br>✓ विशेषण – विशेष्य चयनम्<br>✓ पर्याय – विलोमपद – चयनम् | 10 |
| रचनात्मकं कार्यम् (15 अङ्काः) | 2. **सङ्केताधारितम् औपचारिकम् अथवा अनौपचारिकं पत्रलेखनम्**<br>(मञ्जूषायाः सहायतया पूर्णं पत्रं लेखनीयम्) | 5 |
| | 3. **चित्राधारितं वर्णनम् अथवा अनुच्छेदलेखनम्**<br>(मञ्जूषायाः सहायतया चित्रवर्णनम् अनुच्छेदलेखनं वा करणीयम्) | 5 |
| | 4. **हिन्दीभाषया आङ्ग्लभाषया वा लिखितानां पञ्चसरलवाक्यानां संस्कृतभाषया अनुवादः** | 5 |
| पठित – अवबोधनम् (15 अङ्काः) | 5. **गद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्**<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि। | 3 |
| | 6. **पद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्**<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि। | 3 |
| | 7. **नाट्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्**<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि। | 3 |
| | 8. **श्लोकस्य अन्वयः**<br>(मञ्जूषायाः सहायतया पूर्णः अन्वयः लेखनीयः) | 2 |
| | 9. **घटनाक्रमानुसारं कथालेखनम्** | 4 |
| | | **योगः** = 40 **अङ्काः** |

**पुस्तकम् – 'शेमुषी -संस्कृत-पाठयपुस्तकम् द्वितीयः भागः (दशमश्रेण्यै)**

**परीक्षायै निर्धारिताः पाठाः**

| पाठसङ्ख्या | पाठनाम |
|---|---|
| प्रथमः पाठः | शुचिपर्यावरणम् |
| द्वितीयः पाठः | बुद्धिर्बलवती सदा |
| तृतीयः पाठः | व्यायामः सर्वदा पथ्यः |
| चतुर्थः पाठः | शिशुलालनम् |
| पञ्चमः पाठः | जननी तुल्यवत्सला |
| षष्ठः पाठः | सुभाषितानि |
| सप्तमः पाठः | सौहार्दं प्रकृतेः शोभा |
| अष्टमः पाठः | विचित्रः साक्षी |
| नवमः पाठः | सूक्तयः |
| एकादशः पाठः | प्राणेभ्योऽपि प्रियः सुहृत् |

*** अनुप्रयुक्तव्याकरणस्य अंशानां चयनं यथासम्भवं 'शेमुषी-द्वितीयो भागः' इति पाठ्यपुस्तकात् करणीयम्। यदि ततः न सम्भवति तर्हि 'अभ्यासवान् भव द्वितीयः भागः' इत्यस्मात् कर्तुं शक्यम्।**

**निर्धारिते पाठ्यपुस्तके-**

1. '**शेमुषी**' पाठ्यपुस्तकम् भाग-2 , **संशोधितसंस्करणम्** प्रकाशनम् : रा.शै.प्र.अनु.परि.
2. '**अभ्यासवान् भव**' भाग-2 प्रकाशनम् : रा.शै.प्र.अनु.परि.

**अतिरिक्तपठनार्थम्**

**व्याकरणवीथिः** प्रकाशनम् : रा.शै.प्र.अनु.परि

## आन्तरिक-मूल्याङ्कनम्
## (20 अङ्काः)

**उद्देश्यानि**

- ❖ छात्राणां सृजनात्मकक्षमतायाः विकासः।
- ❖ श्रवण-भाषण-पठन-लेखनकौशलानां विकासः।
- ❖ चिन्तनक्षमतायाः आत्मविश्वासस्य च संवर्धनम्।

| क्र. सं. | गतिविधयः | उदाहरणानि | अङ्काः | निर्देशाः | मूल्याङ्कनबिन्दवः |
|---|---|---|---|---|---|
| 1. | आवधिक-परीक्षाः (पीरियोडिक्-असैस्मैंट) | लिखितपरीक्षा | 05 | विद्यालयेन समये समये लिखितपरीक्षाणाम् आयोजनं करणीयं भवति। | परीक्षासु यत्र विद्यार्थिनः श्रेष्ठाः अङ्काः स्युः तयोः द्वयोः परीक्षयोः एव अधिभारः ग्रहीतव्यः। अपि च आवधिकपरीक्षासु अपि प्रश्नेषु आन्तरिकविकल्पाः देयाः। मूल्याङ्कनसमये यदि छात्रः सर्वान् प्रश्नान् उत्तरति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः सन्ति तेषाम् एव मूल्याङ्कनं करणीयम्। |
| 2 | बहुविधमूल्याङ्कनम् | ❖ कक्षायां पाठितस्य पाठस्य लघुमूल्याङ्कनम्<br>❖ निर्गतपत्राणि<br>❖ प्रश्नोत्तरी<br>❖ मौखिकी परीक्षा<br>❖ प्रतियोगिताः<br>❖ प्रश्नमञ्चस्य आयोजनम् | 05 | कक्षायां पाठित-पाठस्य विषयस्य वा बहुविधं मूल्याङ्कनम् अपेक्षितम् अस्ति। अनेन विद्यार्थिनां विविधकौशलानां मूल्याङ्कनं भवेत्। | ❖ मौलिकता<br>❖ विषयसम्बद्धता<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम् |
| 3. | निवेशसूचिका (पोर्टफोलियो) | ❖ कक्षाकार्यम्<br>❖ सामूहिक-मूल्याङ्कनम्<br>❖ स्वमूल्याङ्कनम्<br>❖ विद्यार्थिनः विषयगताः उपलब्धयः | 05 | विद्यार्थिभिः कक्षायां कृतानां कार्याणाम् उपलब्धीनां च संरक्षणं संयोजनं च सञ्चिकायां पत्रावल्यां वा करणीयम्। एतेन समग्रं मूल्याङ्कनं प्रमाणिकत्वेन भवितुं शक्नोति। | ❖ सुलेखः<br>❖ तथ्यात्मकता<br>❖ प्रामाणिकता<br>❖ समयबद्धता |

| | | | | | |
|---|---|---|---|---|---|
| **4.** | **भाषा-संवर्धनाय गतिविधयः**<br>**(क) श्रवण-भाषण-कौशलम्** | ❖ कथा<br>❖ संवादः / वार्तालापः<br>❖ भाषणम्<br>❖ नाटकम्<br>❖ वार्ताः<br>❖ आशुभाषणम्<br>❖ संस्कृतगीतानि<br>❖ श्लोकोच्चारणम्<br>❖ प्रहेलिकाः | 05 | ❖ छात्राः कामपि कथां श्रावयितुं शक्नुवन्ति।<br>❖ शिक्षकः कमपि विषयं सूचयित्वा परस्परं संवादं कारयितुं शक्नोति।<br>❖ दूरदर्शने वार्तावली इत्याख्यः संस्कृत-कार्यक्रमः प्रसारितः भवति तं द्रष्टुं छात्राः प्रेरणीयाः।<br>❖ श्रवण-कौशल-मूल्याङ्कनाय शिक्षकः स्वयम् अपि कथां श्रावयित्वा ततः सम्बद्ध-प्रश्नान् प्रष्टुं शक्नोति। | ❖ उच्चारणम्<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम्<br>आरोहावरोह-गतियति-प्रयोगः |
| | **(ख) लेखनकौशलम्** | ❖ विविधविषयान् आधृत्य मौलिकलेखनम् यथा– देशः, माता, पिता, गुरुः, पर्यावरणम्, विद्या, योगः, समयस्य सदुपयोगः , शिक्षा, अनुशासनम् इत्यादयः।<br>❖ शैक्षिकभ्रमणस्य संस्कृतेन प्रतिवेदनलेखनम्।<br>❖ दैनन्दिनीलेखनम्।<br>❖ सङ्केताधारितं कथालेखनम्।<br>❖ भित्तिपत्रिकायाः निर्माणम्।<br>❖ श्रुतलेखः<br>❖ सूक्तिलेखनम् | | ❖ छात्राः यथाशक्यं कक्षायामेव लेखनकार्यं कुर्युः।<br>❖ टिप्पणी- पुस्तिकायाः निर्माणम्।<br>❖ वैयक्तिकपरीक्षणम्। | ❖ विषय-सम्बद्धता<br>❖ शुद्धता (विशेषतः पञ्चमवर्णस्यप्रयोगः)<br>❖ समयबद्धता<br>❖ सुलेखः<br>❖ प्रस्तुतीकरणम् |
| | **अवधातव्यम्** –उपर्युक्त-गतिविधयः उदाहरणरूपेण प्रदत्ताः सन्ति। एतदतिरिच्य एतादृशाः अन्यगतिविधयः अपि भवितुमर्हन्ति। | | | | |

*******************************************